पुत्रशोकातुरां जननीं सान्त्वयति तनया ।

इन्द्रो देवराजः ।

चन्द्र उदेति ।

अस्ति नर्म्मदाया उत्तरस्यां दिशि विन्ध्योनाम गिरिः ।

सन्ध्यावन्दनमवश्यमेव कार्य्यम् ।

बुद्धश्चैतन्यश्च सन्न्यासिनौ आस्ताम् ।

सम्प्रति वसन्तकालः संवृत्तः ।

राजा ससम्भ्रमम् उत्थाय महर्षेः पादौ ववन्दे ।

सदा शास्त्रचर्चां कुरु ।

कथमसौ मूर्च्छितः ?

सदुपायेन धनोपार्ज्जनं सुखाय भवति ।

अहो दुर्दिनम् ।

वाणिज्ये वसति लक्ष्मीः, तथैव कृषिकर्म्मणि ।

धैर्य्यधनाः साधवः ।

पर्व्वणि समुद्रस्य वेला वर्द्धते ।

अयमस्य पार्श्वचरः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उष्ट्रः सैकतभूमिषु सुखं चलति ।
समयेऽतीते उद्योगो निष्प्रयोजनः ।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ।
प्रसिद्धमूर्द्ध्वज्वलनं हविर्भुजः ।

तृतीयोऽध्यायः ।

मिश्रोदाहरणानि ।

प्रथमः पाठः ।

वृक्षात् पत्रं पतति । बालकाः पुस्तकं पठन्ति । राजा प्रजा रक्षति । शिशुः सहचरैः सह क्रीड़ति । लक्ष्मणः सीतया सार्द्धं भागीरथीं तरति । औदरिकः मिष्टान्नं भक्षयति । त्वं कथं मृषा ब्रवीषि ? द्विजो वेदमधीते । गावश्चरन्ति । दरिद्राय धनं देहि । मा प्रयच्छेश्वरे धनम् । आतुरस्यौषधं पथ्यम् । नीरोगस्य किमौषधैः । कीर्त्तिर्यस्य स जीवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयः पाठः।

आतपतापितो वटच्छायायां निषीदति। निःसरति विलात् भुजङ्गः। चलिष्ये शतमार्गांसि। इदमस्मभ्यं न रोचते। शैशवे विद्यामुपार्ज्जयेत्। सर्व्वं परवशं दुःखम्। सर्व्वमात्मवशं सुखम्। क्रोधं यत्नेन वर्ज्जये:। अहङ्कारं परित्यजेत्। नाहङ्कारात् परो रिपुः। सदा सत्यं ब्रूयात्। सन्तोषमूलं सुखम्। असन्तोषमूलं दुःखम्।

तृतीयः पाठः।

विद्यासमो बन्धुर्नास्ति। यः शैशवे विद्यमुपार्ज्जयति, स सुखेन जीवनं यापयति। यो बाल्ये आलस्येन क्रीड़या वा कालमतिवाहयति, स चिराय मूर्खो भवति। यत्नेन विद्यारत्नमुपार्ज्जय। दानेन न क्षयं याति विद्यारत्नं महाधनम्। बुद्धिर्यस्य बलं तस्य, निर्बुद्धेस्तु कुतो बलम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थः पाठः ।

हितं मनोहारि च दुर्लभं वचः । मातापितरौ पूजनीयौ । कदापि तयोरप्रियं मा कुरु । गुरुसेवा परमो धर्मः । मातरि पितरि च भक्तिं कुरु । यो मातापितरौ सन्तोषयति, स एव पुत्रः । सर्व्वान् भ्रातृवत् अवलोकय । साधवः सर्व्वभूतेषु दयां कुर्व्वन्ति । कोऽर्थः पुत्रेण जातेन, यो न विद्वान् न धार्म्मिकः । कल्पान्तस्थायिनो गुणाः ।

पञ्चमः पाठः ।

विद्यादाता जन्मदाता समानौ, समं पूजनीयौ । गुरूपदेशं हृदये धारय । अध्ययनसमये प्रशान्तचित्तो भव । चपलतां परित्यज्य विनयमाश्रय । पाठे अवहितो भव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

षष्ठः पाठः ।

धर्म्मं चर । धर्म्मात् परतरं नास्ति । सदा सत्यं ब्रूयात् । सत्यान्न प्रमदितव्यम् । प्राणान्तयेऽपि न मिथ्या भाषित । समूल एष मरिष्यति योऽनृत-मभिवदति । सत्यपरायणे सर्व्वएव विश्वसिति । मिथ्यावादो न कदापि विश्वासभाजनम् । सत्य-वादो सर्व्वेषामादरणीयः । मिथ्यावादो न कुत्रापि प्रतिष्ठां लभते ।

चतुर्थोऽध्यायः ।

प्रथमः पाठः ।

कारकोदाहरणानि ।

कर्त्तृकारकम् ।

गौः शब्दायते । विद्या ददाति विनयम् । धृतराष्ट्रो जन्मान्ध आसीत् । त्वया धनं दीयते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दशरथेनानीतः ऋष्यशृङ्गोमहर्षिः । किं करोमि, क्व यामि ।

कर्म्म ।

दरिद्रान् भर कौन्तेय । सत्यं ब्रूयात् प्रियं ब्रूयात्, न ब्रूयात् सत्यमप्रियम् । पादेन (पदा) स्पृशन्तं नरं दशति द्विजिह्वः । स बधूसमीपं निन्ये विनीतैरवरोधरक्षैः ।

करणम् ।

हस्तेन पुस्तकं गृह्णाति । चक्षुषा पश्यति । जलेन सिञ्चति वृक्षम् । ज्ञानाग्निना पापं दहति मुनिः ।

सम्प्रदानम् ।

दरिद्राय धनं ददाति । देहि मे वाजिनं राजन् । आतुरायौषधं देहि । तृष्णातुराय जलं दीयते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपादानम्।

व्याघ्रात् बिभेति पान्थः। पापात् विरतो भव। मेघात् वारिविन्दवः पतन्ति। भयात् त्रायस्व माम्। हिमालयात् गङ्गा प्रभवति।

अधिकरणम्।

शिशुः शय्यायां शेते। वसन्ते भ्रमणं पथ्यम्। गङ्गायां प्रातः स्नाति नित्यस्नायी। उदिते सूर्य्ये प्रस्थितः।

द्वितीयः पाठः।

विभक्तीनाम् उदाहरणानि।

प्रथमा।

वृक्षः। शिशुः क्रीड़ति। हा पुत्र। दरिद्रान् भर कौन्तेय। अयोध्यायां दशरथ इति ख्यातो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नृपतिरासीत् । विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुम् असाम्प्रतम् ।

द्वितीया ।

जलं पिबति । सत्वरं धावति । योजनं भृत्ये-नानुगतः । कृपणं धिक् । श्रमं विना विद्या न भवति । नदीं यावत् बान्धवमनुव्रजति ।

तृतीया ।

कर्णेन शृणोति । रामः सीतया लक्ष्मणेन च सह दण्डकारण्यं जगाम । केनापि सार्द्धं विरोधो न कर्त्तव्यः । विद्यया हीनः । अलं विवादेन । धनेन प्रयोजनम् । चक्षुषा काणः । पादेन खञ्जः । कर्णेन बधिरः । स्वभावेन तरलः । प्रकृत्या मधुरं गवां पयः । जात्या ब्राह्मणः । वेगेन गच्छति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्थी ।

दरिद्राय धनं देहि । दानाय धनोपार्ज्जनम् । मशकाय धूमः । गुरवे नमः । स त्वां तृणाय मन्यते । अयमारम्भः शुभाय भवतु । यूपाय दारु । इदमस्मभ्यं न रोचते । दिलीपो राजा वशिष्टस्य धेनं प्रातः वनाय सुमोच ।

पञ्चमी ।

अश्वात् पतितो ममार । आसनादवलोकयति । धनात् विद्या गरीयसी । मित्रादन्यः कः परित्रातुं समर्थ ? चैत्रात् पूर्व्वः फाल्गुनः । शयनात् पूर्व्वम् । शैशवात् प्रभृति । ज्ञानादृते वृथा जीवनम् । श्रमात् विना किमपि न लभ्यते । दुःखात् रोदिति ।

षष्ठी ।

अग्नेः शिखा वर्द्धते । शिशोः शयनम् । पयसः पानं शिशुना । सतां पूजितः । मातुः स्मरति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अल्पस्य हेतोर्बहु हातुमिच्छन्, विचारमूढः प्रतिभासि मे त्वम् । प्रजानाम् अधिपः । रजकस्य वस्त्रं देहि ।

सप्तमी ।

गृहे वसति । रजन्यां प्रभातायां प्रस्थितः । साहित्ये निपुणः । व्याकरणे साधुः । विवादे साक्षी । चर्म्मणि द्वीपिनं हन्ति । यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ? गृहीत इव केशेषु मृत्युना धर्म्ममाचरेत् ।

पञ्चमोऽध्यायः ।

समासोदाहरणानि ।

अव्ययीभावः ।

प्रतिदिनमेको मृगः समेष्यति । त्वया यथाशक्ति देयम् । यथाज्ञानं करवाणि । रामः समुद्रस्य पारेजलं वनानि अपश्यत् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्पुरुषः ।

आः कथं कूपपतितोऽसि ? शिक्षकः पितृसमः । विद्याहीनस्य वृथा जीवनम् । सुरक्षितं दैवहतं विनश्यति । धनलोभो निन्दनीयः । असौ विदेशागतो महापुरुषः । कूपोदकं ग्रीष्मे शीतलं भवति । शास्त्रप्रवीणोऽसौ युवा । कथमसौ तीर्थ-काक इव लोलो दृश्यते ?

कर्म्मधारयः ।

सरसि नीलोत्पलं शोभते । अयं पुरुषसिंहः । अथैकदा कृष्णचतुर्दश्यां रात्रौ वीरवरः राजभवनात् निश्चक्राम । सुशोभितः शय्यायामुपविशति ।

द्विगुः ।

पञ्चगवधनः । त्रिलोकी । त्रिभुवनम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बहुव्रीहिः ।

दीर्घबाहुः पुरुषः । अयं महामतिः । स्थिर-बुद्धिर्भव । मूर्खस्य निरर्थकं जन्म । कृतकर्म्मा भृत्यः । रामः सानुजो वनमाश्रितः ।

द्वन्द्वः ।

रामलक्ष्मणौ सीतया सह वनं जग्मतुः । तत्र सर्व्वे ते कन्दमूलफलैर्जीवनं धारयन्ति स्म । मातापितरौ पूजनीयौ । पितापुत्रौ गच्छतः । सूर्य्याचन्द्रमसौ यस्य मातामहपितामहौ । जगतः पितरौ वन्दे पार्व्वती-परमेश्वरौ ।

षष्ठोऽध्यायः ।

स्त्रीप्रत्ययः ।

प्रकृत्यैव प्रिया सीता रामस्यासीन्महात्मनः, तथैव रामः सीतायाः प्राणेभ्योऽपि प्रियोऽभवत् । गौरीगुरुः पावनो हिमालयः । सूचिभेद्यमिदं तमः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सिंही शावकान् यत्नेन पालयति । कोकिलाकलरवो वने वने श्रूयते । धरित्री बहूनां रत्नानां जनयित्री । कौशल्या रामस्य माता । शान्ता राज्ञो दशरथस्य दुहिता । यामिनी प्रभाता । राज्ञो शिविकारूढ़ा याति । भगवतीं भागीरथीं प्रार्थये । पुत्रवती भव । धावन्तीं हरिणीं प्रतिनिवर्त्तयति । इति मे मतिः । पाञ्चालीमर्ज्जुनं उवाच । यादृशी साधना यस्य सिद्धिर्भवति तादृशी । आचार्य्यानीमर्च्चयति शिष्यः । सा तस्य मातुलानी । क्षत्रियजातीया स्त्री क्षत्रिया क्षत्रियाणी वा, क्षत्रियस्य पत्नी क्षत्रियी ।

सप्तमोऽध्यायः ।

नीतिगर्भाण्युपाख्यानानि ।

प्रथमः पाठः ।

"उपायेन हि तत् साध्यं, न यत् साध्यं पराक्रमैः ।"

अस्ति ब्रह्मारण्ये कर्पूरतिलकोनाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म । यद्ययं केनाप्युपायेन म्रियेत, तदास्माकमेतद्देहेन मास-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुष्टयस्य स्वेच्छाभोजनं भवेत्। ततस्तन्मध्यादेकेन वृद्धशृगालेन प्रतिज्ञा कृता। मया बुद्धिप्रभावात् अस्य मरणं साधयितव्यम्। अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा प्रणम्योवाच, "देव, दृष्टिप्रसादं कुरु।" हस्ती ब्रूते, "कस्त्वं, कुतः समायातः?" सोऽवदत्, "जम्बुकोऽहं, सर्व्वैर्वनवासिभिः पशुभिः मिलित्वा भवत्सकाशं प्रस्थापितः, यत् विना राज्ञा स्थातुं न युक्तम्, तदवाटवीराज्ये अभिषेक्तुं भवान् सर्व्वस्वामिगुणोपेतो निरूपितः। तदयथा लग्नवेला न चलति, तथा कृत्वा सत्वरमागम्यतां देवेन।" इत्युक्त्वा उत्थाय चलितः। ततोऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालप्रदर्शितवर्त्मनि धावन् महापङ्के निमग्नः। ततस्तेन हस्तिनोक्तं "सखे शृगाल, किमधुना विधेयम्? महापङ्के पतितोऽहम्!" शृगालेन विहस्योक्तम्? "देव मम पुच्छाग्रे हस्तं दत्त्वोत्तिष्ठ। यत् मम वचसि त्वया विश्वासः कृतः, तस्य फलमेतत्।" ततो महापङ्के निमग्नो हस्ती शृगालैर्भक्षितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वितीयः पाठः ।

"बुद्धिर्यस्य बलं तस्य ।"

अस्ति मन्दरानाम्नि पर्व्वते दुर्दान्तो नाम सिंहः । स च सर्वदा पशूनां बधं विदधान एवास्ते । ततः सर्वैः पशुभिर्मेलकं कृत्वा स सिंहो विज्ञप्तः । "देव, किमर्थं सर्वपशुबधः क्रियते ? वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः ।" सिंहेनोक्तम् "यद्येतदभिमतं भवताम्, तर्हि भवतु ।" ततः प्रभृति प्रत्यहमेकैकं पशुं भक्षयन्नास्ते । अथ कदाचित् कस्यापि वृद्धशशकस्य वारः प्राप्तः । ततः सोऽचिन्तयत् । "मन्दं मन्दमुपगच्छामि ।" ततः सिंहोऽपि तस्य विलम्बं दृष्ट्वा क्षुधापीड़ितः कोपात् तमुवाच । "कुतस्त्वं विलम्बादागतोऽसि ?" शशकोऽब्रवीत् । "नाहमपराधः । पथि अन्येन सिंहेन बलात् धृतः । तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुम् अत्रागतोऽस्मि ।" सिंहः सकोपमाह, "सत्वरं गत्वा मां दर्शय,

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

क्वासौ दुरात्मा तिष्ठति ।" ततः शशकस्तं गृहीत्वा गभीरकूपसमीपमागतः । "अत्रागत्य पश्यतु स्वामी" इत्युक्त्वा तस्मिन् कूपजले तस्यैव प्रतिबिम्बं दर्शितवान् । ततोऽसौ सिंहो दर्पाध्मातस्तस्य कूपस्योपरि आत्मानं निक्षिप्य पञ्चत्वं गतः ।

तृतीयः पाठः ।

"त्यज दुर्जनसंसर्गं, भज साधुसमागमम् ।"

अस्ति कस्मिंश्चित् प्रान्तरे महान् पिप्पलवृक्षः । तत्र हंसकाकौ निवसतः । अथ कदाचित् ग्रीष्मसमये परिश्रान्तः कश्चित् पथिकस्तत्र तरुतले सुप्तः । ततः क्षणान्तरे तन्मुखात् वृक्षच्छाया अपगता । अनन्तरं सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य कृपया पुण्यात्मना तद्वृक्षस्थितेन हंसराजेन पक्षौ प्रसार्य पुनस्तन्मुखे छाया कृता । ततो निर्भयं निद्रासुखिना पथि श्रमणाकुलेन परिश्रान्तेन पान्थेन

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुखव्यादानं कृतम् । अनन्तरं स्वभावदौर्जन्येन परसुखम् असहिष्णुः स काकः पथिकस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः । ततो यावत् असौ उत्थाय ऊर्द्धं निरीक्षते, तावत् तेनावलोकितो हंसो धनुषा हतः ।

चतुर्थः पाठः ।

"उपाय चिन्तयेत् प्राज्ञस्तथापायञ्च चिन्तयेत् ।"

अस्ति दक्षिणापथे विन्ध्यो नाम पर्व्वतः । तत्रैव नर्म्मदातीरे वटपादपे वका निवसन्ति । तस्य वटस्याधस्तात् विवरे सर्पस्तिष्ठति । स च वकानां बालापत्यानि खादति । ततः शोकार्त्तानां वकानां प्रलापं श्रुत्वा केनचित् वृद्धेन वकेनोक्तम् । "भोः एवं कुरुत यूयम् । मत्स्यान् आनीय नकुलविवरादारभ्य सर्पविवरं यावत् पङ्क्तिक्रमेण एकदेशो मत्स्यान् विकीर्य्य धरिष्यथ ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ततस्तदाहारवर्त्मना नकुलेनागत्य द्रष्टव्यः, स्वभावद्वेषात् व्यापादयितव्यः सर्पः ।" तथानुष्ठिते सति तत् वृत्तम् । अथ नकुलेन वृक्षोपरि पक्षिशावकानां रवः श्रुतः । पश्चात् तेन नकुलेन वकशावकाः खादिताः ।

पञ्चमः पाठः ।

"नीचः श्राव्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।"

अस्ति गोतमारण्ये महातपा नाम मुनिः तेनाश्रमसन्निधाने मूषिकशावकः काकमुखात् भ्रष्टो दृष्टः । ततो दयायुक्तेन तेन मुनिना नीवारकणैः मूषिकोऽसौ संवर्द्धितः । तञ्च मूषिकं खादितुमनुधावन् विड़ालो मुनिना दृष्टः । पश्चात् तपःप्रभाववशात् तेन मुनिना मूषिको बलिष्ठो विड़ालः कृतः । स विड़ालः कुक्कुरात् बिभेति । ततोऽसौ कुक्कुरः कृतः । कुक्कुरस्य व्याघ्रात् महद्भयम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदनन्तरं स व्याघ्रः क्षतः। अथ व्याघ्रमपि तं मूषिकनिर्विशेषं पश्यति मुनिः। अथ सर्वे तत्रत्या जनास्तं व्याघ्रं दृष्ट्वा वदन्ति, "अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः।" एतत् श्रुत्वा स व्याघ्रो व्यथितोऽचिन्तयत्। "यावदनेन मुनिना जीवितव्यं, तावदिदं मम स्वरूपाख्यानम् अकीर्त्तिकरं न अपयास्यति।" इति समालोच्य स मुनिं हन्तुम् उद्यतः। मुनिना तस्य चिकीर्षितं ज्ञात्वा "पुनस्त्वं मूषिको भव," इत्युक्त्वा स पुनर्मूषिक एव क्षतः।

षष्ठः पाठः।

"सहसा विदधीत न क्रियाम्।"

अस्ति उज्जयिन्यां माधवोनाम ब्राह्मणः। तस्य पत्नी प्रसूता। सा बालापत्यरक्षार्थं स्वामिनवख्याप्य स्नातं गता। अथ ब्राह्मणस्य क्षते राज्ञः पार्व्वणश्राद्धं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दातुमागतो जनः (१)। तं दृष्ट्वा ब्राह्मणः सहज-दारिद्र्यात् अचिन्तयत्। "यदि सत्वरं न गच्छामि, तदान्यः कश्चित् श्राद्धं ग्रहीष्यति। शिशोश्चात्र रक्षकः कोऽपि नास्ति। तत् किं करोमि? चिरकालपालितम् अमुम् नकुलं बालरक्षार्थं व्यवस्थाप्य गच्छामि।" तथा कृत्वा गतः। ततस्तेन नकुलेन गृहं प्रविशन् सर्पो दृष्टः खण्डितश्च। अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वर-मुपगम्य तस्य चरणयोर्लुलोट। ततोऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रोऽनेन भक्षित इति अविचार्य्य तं नकुलं व्यापादितवान्। अनन्तरं यावदुपसृत्य पश्यति ब्राह्मणस्तावत् बालकः सुखः स्वपिति, सर्पस्तु व्यापादितस्तिष्ठति। ततोऽसौ ब्राह्मणः परं विषाद-मुपगतः।

---

(१) "अथ ब्राह्मणस्येत्यादि"—श्राद्धदानार्थं ब्राह्मणं निमन्त्रयितुं कश्चित् जन आगत इत्यर्थः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सप्तमः पाठः ।

"गुरुजनादेशः सर्व्वथा पालनीयः ।"

कस्मिंश्चिदधिष्ठाने सुबुद्धिनामा ब्राह्मणः प्रतिवसतिस्म । स च प्रयोजनवशात् ग्रामे प्रस्थितः स्वमात्रा अभिहितः, "वत्स, कथमेकाकी व्रजसि, तदन्विष्यतां कश्चित् हितोयः सहायः ।" स आह "अम्ब, मा भैषीः, निरुपद्रवोऽयं पन्थाः, कार्य्यवशादेकाकी गमिष्यामि ।" अथ तस्य तं निश्चयं ज्ञात्वा समोपस्थसरसः सकाशात् कर्कटमेकमादाय मात्राभिहितम् । "वत्स, अवश्यं यदि गन्तव्यम्, तदेष कर्कटोऽपि सहायस्ते भवतु ।" सोऽपि मातुरादेशतः उभाभ्यां पाणिभ्यां तं संगृह्य कर्पूरपुटिकामध्ये निधाय शीघ्रं प्रस्थितः । अथ गच्छन् ग्रीष्मेण सन्तप्तः कञ्चित् पथिश्रं वृक्षमासाद्य तस्य अधस्तात् सुप्तः । अत्रान्तरे वृक्षकोठरान्निर्गत्य सर्पस्तत्समोपमागतः । सोऽपि कर्पूरसुगन्धसहजप्रियत्वात् तं परित्यज्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वस्त्रं विदार्य्याभ्यन्तरगतां कर्पूरपुटिकामतिलौल्यात् अभक्षयत् । सोऽपि कर्कटस्तत्रैव स्थितः सन् सर्पप्राणानपाहरत् । ब्राह्मणोऽपि यावत् प्रबुद्धः पश्यति, तावत् समीपे क्षणसर्पौ निजपार्श्वे कर्पूरपुठिकोपरि मृतस्तिष्ठति । तं दृष्ट्वासौ अचिन्तयत् "कर्कटेनायं हतः ।" इति प्रसन्नोभूत्वा अब्रवोत् । "भोः सत्यमभिहितं मम मात्रा, यत् पुरुषेण कोऽपि सहायः कार्य्यः, नैकाकिना गन्तव्यम् । यतो मया श्रद्धापूरितचेतसा मातुर्वचनमनुष्ठितम्, तेनाहं कर्कटेन सर्पाद्रक्षितः ।"

अष्टमः पाठः ।

"नास्ति जीवात् परो रिपुः ।"

अस्ति मालवदेशे पद्मगर्भनामधेयं सरः । तत्रैको वृद्धः सामर्थ्यहीनो वकः उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित् कुलीरकेण दूरादेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दृष्टः पृष्टश्च। "किमिति भवान् आहारपरित्यागेन तिष्ठति ?" वकेनोक्तम्। "मत्स्या मम जीवनहेतवः। ते चावश्यमेव कैवर्त्तैरागत्य व्यापादयितव्याः, इति वार्त्ता नगरोपान्ते मया श्रुता, तदितो वर्त्तना भावादेव अस्मन्मरणमुपस्थितमिति ज्ञात्वा आहारेऽप्यनादरः कृतः"। ततः सर्वैर्मत्स्यैरालोचितम्। "अस्मिन् समये तावदुपकारकएवायमुपलच्यतेऽस्माकम्। तदयमेव कर्त्तव्यं पृच्छ्यताम्।"

मत्स्या ऊचुः। "भो वक, अस्माकं कोऽत्र रक्षोपायः ?" वको वदति। "अस्ति रक्षोपायः जलाशयान्तराश्रयणम्। तत्राहमेकैकशो युष्मान् नयामि।" मत्स्यैरपि भयादुक्तम्। "एवमस्तु।" ततोऽसौ वकस्तान् मत्स्यान् एकैकशोनीत्वा कस्मिंश्चिद्देशे खादित्वा पुनरागत्य वदति, "ते मया जलाशयान्तरे स्थापिताः।" अनन्तरं कुलीरकस्तमुवाच। "भो वक, मामपि तत्र नय।" ततो वकोऽपि अपूर्व्वकुलीरकमांसार्थी सादरं तं नीत्वा तत्र स्थले धृतवान्। कुलीरकोऽपि मत्स्यकण्टकाकीर्णं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत् स्थलमवलोक्याचिन्तयत्, "हतोऽस्मि मन्द-भाग्यः, भवतु इदानीं समयोचितं व्यवहरामि ।" इत्यालोच्य स कुलीरकस्तस्य वकस्य ग्रीवां चिच्छेद । स वकः पञ्चत्वं गतः ।

नवमः पाठः ।

महाभारतम् ।

"पश्चात्तापोऽविवेकिनाम् ।"

जनमेजयं प्रति सरमायाः शापः ।

जनमेजयः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रम् (१) उपास्ते । तस्य भ्रातरस्त्रयः, श्रुतसेनः, उग्रसेनो, भीमसेन इति । तेषु तत् सत्रम् उपासीनेषु आगच्छत्

---

(१) दीर्घसत्रं बहुवर्षव्यापियज्ञविशेषम् । उपास्ते अनुतिष्ठति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सारमेयः (१)। स जनमेजयस्य भ्रातृभिरभिहतो (२) मातुः समीपमुपागच्छत्।

तं माता ऽवाच। "किं रोदिषि? केनासि अभिहतः" (२) इति। स मातरं प्रत्युवाच। "जनमेजयस्य भ्रातृभिः अभिहतोऽस्मि।" इति।

तं माता प्रत्युवाच, "व्यक्तं (३) त्वया तत्रापराद्धम्, येनासि अभिहतः" इति। स तां पुनरुवाच। "सापराध्यामि किञ्चित्।"

तत् श्रुत्वा तस्य माता सरमा, दुःखार्त्ता कुरुक्षेत्रम् उपागच्छत्, यत्र स जनमेजयः सह भ्रातृभिः दीर्घसत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तः। "अयं मम पुत्रो न किञ्चिदपराध्यति, किमर्थम् अभिहतः?" इति।

न किञ्चिदुक्तवन्तस्ते। सा जनमेजयमुवाच। "यस्मादयमभिहतोऽनपकारी, तस्मात् अदृष्टं त्वां

---

(१) सारमेयः, सरमा देवानां कुक्कुरी, तस्याः पुत्रः कुक्कुरः।

(२) अभिहतः—ताड़ितः।

(३) व्यक्तम्—स्पष्टम्, निश्चितम्—क्रियाविशेषणम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भयमागमिष्यति ।" इति । जनमेजयः एवमुक्तः सरमया भृशं विषण्ण आसीत् ।

स तस्मिन् सत्रे समाप्ते हस्तिनापुरं प्रत्येत्य पुरोहितमनुरूपमन्विष्यन् परं यत्नमकरोत् । "को मे पापं शमयेत् ।"

अथ कदाचित् मृगयां गतो जनमेजयः कस्मिंश्चित् स्वविषये (१) आश्रममपश्यत् । तत्र कश्चित् ऋषिः श्रुतश्रवा नाम आसीत् । तस्य पुत्रः सोमश्रवा नाम ।

स नमस्कृत्य तमृषिमुवाच । "भगवन् अयं तव पुत्रो मम पुरोहितोऽस्तु ।" स एवमुक्तः प्रत्युवाच जनमेजयम् । "पुत्रोऽयं मम महातपस्वी । समर्थोऽयं भवतः सर्वाणि पापानि शमयितुम् । अस्य तु एकं व्रतमस्ति यद्येनं कश्चित् ब्राह्मणः कञ्चिदर्थमभियाचते, तस्मै ददात्ययम् । यदि एतदुत्सहसे ततो नयस्वैनम् ।" इति ।

---

(१) स्वविषये—स्वराज्ये ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तेनैवमुक्तः जनमेजयः प्रत्युवाच । "भगवन् तथा भविष्यति" इति । स तं पुरोहितमुपादाय उपाद्वत्तः (१) भ्रातॄन् उवाच । "मया अयं हृत उपाध्यायः, यत् अयं वदेत् तत् कार्य्यम्" इति । तेनैवमुक्ता भ्रातरस्तथा चक्रुः ।

दशमः पाठः ।

पञ्चदशाहोरात्राः (२) पक्षः । द्वौ पक्षौ शुक्लः कृष्णश्च । तौ मासः । वैशाखादयो द्वादश मासाः । ऋतवः षट् । ग्रीष्मो, वर्षाः शरत्, हेमन्तः, शिशिरो-वसन्तश्चेति । वैशाखज्यैष्ठौ ग्रीष्मः । आषाढ़श्रावणौ वर्षाः । भाद्राश्विनौ शरत् । कार्त्तिकमार्गशीर्षौ हेमन्तः । पौषमाघौ शिशिरः । फाल्गुनचैत्रौ

---

(१) उपाद्वत्तः प्रत्यागतः ।

(२) "रात्राह्नाहाः पुंसि ।" पाणिनिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वसन्तः । केचित् तु ज्यैष्ठाषाढौ ग्रीष्मः इत्यादिक्रमेण गणयन्ति ।

नव ग्रहाः । सूर्य्यचन्द्रमङ्गलबुधबृहस्पतिशुक्रशनैश्चरराहुकेतवः ।

द्वादश राशयः । मेष वृष मिथुन कर्कट सिंह कन्या तुला वृश्चिक धनुर्मकर कुम्भ मीना इति । भास्करे मेषराशिस्थे वैशाखः, वृषराशिस्थे ज्यैष्ठः, इत्यादिक्रमेण भास्करे मीनराशिस्थे चैत्रः ।

पञ्चदश तिथयः । प्रतिपत्, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावस्या वा ।

दश दिशः । उदीची, प्राची, दक्षिणा, प्रतीची, ऐशानी, वायवी, आग्नेयी, नैर्ऋती, ऊर्द्ध्वमधश्च ।

पञ्च ज्ञानेन्द्रियाणि । चक्षुः, कर्णः, नासिका, रसना, त्वक् च । दर्शनेन्द्रियं चक्षुः । एकेन चक्षुषा हीनः काण इत्युच्यते, द्वाभ्यां चक्षुर्भ्यां हीनोऽन्धः । कर्णः श्रवणेन्द्रियम् । कर्णेन हीनो वधिर उच्यते ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

नासा घ्राणेन्द्रियम् । नासिकाविहीनो विनसो विग्रो बा कथ्यते । रसना स्वादग्रहणद्वारम् । त्वक् स्पर्शेन्द्रियम् । पाणिपादादीनि अङ्गानि कर्म्मेन्द्रियाणि ।

चत्वारोवेदाः । ऋक् यजुः साम अथर्व्व च ।

सङ्ख्यापूरणवाचकशब्दाः ।—प्रथमः ; द्वितीया ; तृतीयः ; चतुर्थः ; पञ्चमः ; षष्ठः ; सप्तमः ; अष्टमः ; नवमः ; दशमः ; एकादशः ; द्वादशः ; त्रयोदशः , चतुर्दशः ; पञ्चदशः ; षोड़शः ; सप्तदशः ; अष्टादशः ; ऊनविंशः ; विंशः ; विंशतितमः ; त्रिंशः ; त्रिंशत्तमः ; चत्वारिंशः , चत्वारिंशत्तमः ; पञ्चाशः , पञ्चाशत्तमः ; षष्ठितमः ; सप्ततितमः ; अशीतितमः ; नवतितमः ; शततमः ; सहस्रतमः । इत्यादयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एकादशः पाठः ।

नीतिगर्भाः श्लोकाः ।

विद्या ।

विद्वत्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्व्वत्र पूज्यते ॥
पण्डितेषु गुणाः सर्वे मूर्खे दोषा हि केवलम् ।
तस्मात् मूर्खसहस्रेषु प्राज्ञएकोविशिष्यते ॥
विद्या ददाति विनयं, विनयात् याति पात्रताम् ।
पात्रत्वात् धनमाप्नोति, धनात् धर्म्मं ततः सुखम् ॥
माता शत्रुः, पिता वैरी, यदि बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये वको यथा ।

दुर्जनः ।

दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत् यत्नतो बन्धुं विषकुम्भं पयोमुखम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जीवनं चपलम् ।

नलिनीदलगतजलमतितरलम् ।
तद्वज्जीवनमतिशयचपलम् ॥

विषया अनित्याः ।

मा कुरु धनजनयौवनगर्वम् ।
हरति निमेषात् कालः सर्वम् ॥
सर्व्वे चयान्ता निचयाः(१) पतनान्ताः समुच्छ्रयाः(२) ।
संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितम् ॥
तस्मात् पुत्रेषु दारेषु मित्रेषु च धनेषु च ।
नातिप्रसङ्गः(३) कर्त्तव्यो, विप्रयोगो हि तैर्ध्रुवम् ॥

सभा ।

न सा सभा यत्र न सन्ति वृद्धाः ।
वृद्धा न ते, ये न वदन्ति धर्म्मम् ॥
नासौ धर्म्मो, यत्र न सत्यमस्ति ।
न तत् सत्यं, यच्छलेनानुविद्धम् ॥

---

(१) निचयाः वस्तुसमूहाः ।
(२) समुच्छ्रयः अत्युन्नतिः, "अत्युच्चैः पतनाय" इत्यर्थः ।
(३) अतिप्रसङ्गः अत्यासक्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

द्वादशः पाठः ।

रामायणम् ।

कौशल्यारामसंवादः ।

प्रविश्य तु तदा रामो मातुरन्तःपुरं शुभम् ।
ददर्श मातरं तत्र नित्यं व्रतपरायणाम् ॥
सा चिरस्यात्मजं दृष्ट्वा मातृनन्दनमागतम् ।
अभिचक्राम(१) संहृष्टा किशोरं वड़वा यथा ॥
स मातरमुपक्रान्तामुपसंगृह्य(२) राघवः ।
परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्द्धनि ॥
तमुवाच दुराधर्षं राघवं सुतमात्मनः ।
कौशल्या पुत्रवात्सल्यादिदं प्रियहितं वचः ॥
वृद्धानां धर्म्मशीलानां राजर्षीणां महात्मनाम् ।
आप्नुह्यायुश्च कीर्त्तिञ्च धर्म्मचाप्युचितं कुले ॥
सत्यप्रतिज्ञं पितरं राजानं पश्य राघव ।
अद्यैव त्वां स धर्म्मात्मा यौवराज्येऽभिषेक्ष्यति ॥"

---

(१) अभिचक्राम—प्रत्युज्जगाम ।

(२) उपसंगृह्य—पादस्पर्शपूर्वकं नमस्कृत्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दत्तमासनमालभ्य भोजनाय निमन्त्रितः ।
मातरं राघवः किञ्चित् प्रसार्याञ्जलिमब्रवीत् ॥
"देवि नूनं न जानीषे महद्भयमुपस्थितम् ।
इदं तव च दुःखाय सीताया लक्ष्मणस्य च ॥
गमिष्ये दण्डकारण्यं किमनेनासनेन मे ।
विष्टरासनयोग्योहि(१) कालोऽयं समुपस्थितः ॥
चतुर्दश हि वर्षाणि वत्स्यामि विजने वने ।
कन्दमूलफलैर्जीवन् हित्वा मुनिवदामिषम् ॥
भरताय महाराजो यौवराज्यं प्रयच्छति ।
मां पुनर्दण्डकारण्यं प्रवासयति दुर्गमम् ॥
सा निकृत्तेव सालस्य यष्टिः परशुना वने ।
पपात सहसा देवी देवतेव दिवश्च्युता ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव ।
राम उत्थापयामास मातरं गतचेतनाम् ॥
सा राघवमुपासीनमदुःखार्हा सुखोचिता ।
उवाच पुरुषव्याघ्रमुपमृज्याश्रुणि लक्ष्मणे ॥

---

(१) विष्टरासनम्—कुशासनम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"यदि पुत्र न जायेथा मम शोकाय राघव ।
नस्र दुःखमतोभूयः पश्येयमहमप्रजाः ॥
एक एव हि बन्ध्यायाः शोको भवति मानसः ।
अप्रजास्त्रीनि सन्तापो नान्यः पुत्र विद्यते ॥
त्वयि सन्निहितेऽप्येवमहमस्रि निराकृता ।
किं पुनः प्रोषिते तात ध्रुवं मरणमेव मे ॥
दुःखौघेन परिक्लिन्नं हृदयं सीदतीव मे ।
प्राहृषीव महानद्याः स्रष्टं कूलं नवाम्भसा ॥"

अष्टमोऽध्यायः ।

TRANSLATION EXERCISES.

Exercise I.

ENGLISH.	SANSKRIT.
Go to bed.	शय्यायां शेष्व ।
Who can run ?	को धावितुं समर्थः ?
Sit by me.	मम पार्श्वे उपविश ।
It is a mad dog.	अयं मत्तः कुक्कुरः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ENGLISH.	SANSKRIT.
He is a bad lad.	स दुष्टोबालकः ।
Why is she so sad ?	कथं सा एवं दुःखिता ?
The sun is set.	सूर्य्योऽस्तं गतः ।
My net is wet.	मम जालमार्द्रम् ।

Exercise II.

Do not hurt me.	मा मां प्रहर ।
Dring the milk.	दुग्धमिदं पिव ।
Ring the bell.	घण्टां वादय ।
The grass is soft.	घासोऽयं कोमलः ।
The spot is damp.	स्थानमिदमार्द्रम् ।
Pick up the brick.	इष्टकमिममुत्थापय हस्तेन ।
Bring my silk dress.	मम चौमं परिच्छदमानय ।
He went to his shop.	स तस्य विपणिं ययौ ।
He is a rich man.	असौ धनवान् ।
This is my left hand.	अयं मम वामोहस्तः ।
Can he sing ? No.	अपि स गातुं समर्थः ? न हि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Exercise III.

Rama is ill. His skin is hot. I will not let him run in the sun. He must sit still. He must put on a warm dress. He has slept long. I trust he will soon be right.

रामः पीड़ितः । तस्य गात्रमुष्णम् । नाहमस्य रौद्रे भ्रमणतुमनुमंस्ये । तेनाधुना स्थिरमुपवेष्टव्यम् । तेनावश्यमुष्णवसनं परिधातव्यम् । स बहुक्षणं निद्राण आस्ते सम्भवयामि यदसौ शीघ्रमेव नीरोगो भविष्यति ।

Exercise IV.

One night, when the wind was high, a small bird flew into my room, from a tree that was nigh. The rough wind had thrown down its nest from the bough on which it had been built and the poor bird was hurt. I caught it and fed it. I kept it till it could fly with ease.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कस्याश्चित् रात्रौ, वायौ प्रबलं वहति कश्चित् क्षुद्रः पक्षी सन्निहितात् तरोः मम गृहे उड्डीय आगतः । प्रखरोवायुरस्य नीड़ं वासवृक्षशाखायाः पातयामास । तेन चासौ तपस्वी भृशमाहतः । अहममुं हस्ताभ्यामुत्थाप्य खाद्यदानादिना तावत् यत्नेन रक्षितवान्, यावदसौ सुखेनोड्डयनसमर्थो न बभूव ।

Exercise V.

The sun is set. The air is cool. There is no cloud in the blue sky. The cows lie down on the soft grass and chew the cud. A sweet smell comes from a bed of roses. Flights of birds fly into the thick wood. The corn looks fresh and green. It grows dark. The bright moon and stars will soon rise.

गतोऽस्तमर्कः । शीतलोवायुर्वाति । नीले नभसि मेघो न विद्यते । गावः कोमलानां घासानामुपरि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शेरते रोमन्थायन्ते च । स्थलपद्मपुष्पवाटिकाया मधुरो गन्धः प्रवहति । पक्षिणां राजयः गहनं वनमुड्डीय गच्छन्ति । शस्यं प्रत्यग्रं हरिद्वर्णञ्च लक्ष्यते । क्रमात् सर्वं दिङ्मुखं तमोमयं भवति । उज्ज्वलश्चन्द्रो नक्षत्राणि चोज्ज्वलानि झटित्युदेष्यन्ति ।

सम्पूर्णम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

IMPORTANT NOTICE.

SCHOOL-BOOKS

BY

THE SAME AUTHOR.

1. Sanskritaparichaya, Parts I. and II., containing easy moral lessons in Sanskrit. (Approved by the Central Text-book Committee, 1916.)
2. Barnaprakasa, Parts I. and II., [illegible]
3. Saralapatha. [Intermediate Reader.]
4. Barnashikha, finally approved 1913.
5. Sanskrit-English Dictionary. (*In the Press.*)
6. Matriculation History of India in Bengali, prescribed by the University as a Matriculation Text-book.
7. Matriculation History of India in Hindi. (*In the Press.*)
8. Matriculation Sanskrit Composition. (*In the Press.*)
9. Beginner's English Grammar in Bengali.
10. Matriculation Sanskrit Grammar. (*In the Press.*)
11. Matriculation [illegible]ngali Composition. (বাঙ্গালা রচনা ও অনুবাদ) [illegible] ... ১৲
12. The H[illegible]tion for Beginners.
13. [illegible]mar.

[illegible] English Grammar in Hindi. Price 1s. only.

[illegible]RIEE—7, Kalidas Lane.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection